3.7.3

3.7.3

संस्थायाः अन्यविश्वविद्यालयैः / लब्धप्रतिष्ठप्रकाशनसंस्थाभिः सह संयुक्तप्रकाशनकार्यक्रमस्य विवरणं प्रदीयताम् Answer: सम्पूर्णानंद संस्कृत विश्वविद्यालयस्य विशिष्टायाम् अष्टादशी इत्यस्यां योजनायां प्राचीनदुर्लभसंस्कृतग्रन्थानां प्रकाशनाय विभिन्नेभ्यः विश्वविद्यालयेभ्यः लब्धप्रतिष्ठप्रकाशनसंस्थाभ्यः आर्थिकं योगदानं दातुम् अवसरः प्रकल्पितः वर्तते। एतदनु बहवो हि ग्रन्थाः प्रकाशिताः । क्रमशः यथा - 1.हैदराबादस्थ - उस्मानियाविश्वविद्यालयस्य संस्कृत अकाडमी इत्यनेन विश्वविद्यालयस्य विरलग्रन्थपुनर्मुद्रणकार्यक्रमान्तर्गतत्वेन 2019 तमे वर्षे रामकृष्णयुधिष्ठिरचरितचम्पू इतीदं विशिष्टं चम्पूकाव्यं प्रकाशितम् अस्ति। उस्मानियाविश्वविद्यालयस्य कुलसचिवः आचार्यः गोपालरेड्डिवर्यः अस्य प्रकाशकः वर्तते। संस्कृतअकाडमी इत्यस्य प्रभारी निदेशकः असौ प्राक्तनस्य राष्ट्रियसंस्कृतसंस्थानस्य आर्थिकं सहयोगम् अवाप्य एनं ग्रन्थम् एकवर्षस्य अवधावेव प्राकाशयत्। 2.संस्कृत-अकाडमी इत्यस्य षष्ठ्यब्दग्रन्थमालायाः षष्ठं कुसुमम् आन्ध्रकाव्यकथाः नाम्ना 2020 तमे संवत्सरे प्रकाशितम् । संस्कृत-अकाडमी इत्येषा सम्पूर्णानंद संस्कृत विश्वविद्यालयस्य मानिता शोधसंस्था वर्तते। शिरोमणिना सन्निधानं सूर्यनारायणशास्त्रिणा विरचितस्य एतस्य विशिष्टस्य कथाग्रन्थस्य प्रकाशनं उस्मानियाविश्वविद्यालयस्य संस्कृत-अकाडमी इत्यनया कृतम् । अस्याः निर्देशकः आचार्यः के. नीलकण्ठम् वर्यः विश्वविद्यालयस्य आर्थिकं सहयोगं सम्प्राप्य वर्षत्रये (2018- 2020) एनं ग्रन्थं सम्पादितवान्। अशीतिसहस्रोत्तरदशलक्षरूप्यकाणि (10,80,000 ) एकसहस्रपुटात्मकस्य तेलगुलिप्यां विद्यमानस्य ग्रन्थस्य प्रकाशनाय प्रदत्तः । 3. 2021 तमे संवत्सरे श्रीराघवयादवीयम् इति अनुलोम - विलोमकाव्यम् एकं विश्वविद्यालयस्य आर्थिकं सहयोगं सम्प्राप्य उस्मानियाविश्वविद्यालयस्य संस्कृत-अकाडमी इत्यनया वर्षद्वये (2020- 2021) एषः ग्रन्थः सम्पादितः । संस्कृतअकाडमी इत्यस्याः निर्देशकः आचार्यः के. नीलकण्ठम् वर्यः विश्वविद्यालयस्य आर्थिकं सहयोगं सम्प्राप्य एनं प्राकाशयत् । विश्वविद्यालयः ग्रन्थस्य सम्पादनावसरे प्रकाशनावसरे मूल्याङ्कनावसरे पूर्णशः सहयोगं प्रायच्छत्। संस्कृत-अकाडमी विश्वविद्यालययोः संयुक्तेन सहयोगेन विशिष्टाः ग्रन्थाः लोकार्पिताः सन्ति। 4. बेङ्गलूरुनगरस्थम् अक्षरम् इतीदं संस्कृतभारत्याः प्रकाशनं २०२० तमे संवत्सरे संस्काररत्नमाला इत्यस्याः ग्रन्थमालायाः प्रकाशनं विश्वविद्यालयस्य संयुक्तसहयोगेन अकरोत्। संस्काररत्नमाला इत्येषः धर्मशास्त्रीयः ग्रन्थः वर्तते। अस्मिन् ग्रन्थे गर्भधानम् उपनयनम् इत्यादयः षोडशः संस्काराः वर्णिताः सन्ति। विकिपीडिया मध्ये अपि अयं ग्रन्थः समारोपितः वर्तते। १. संस्काररत्नमाला - प्रथमभागे प्रथमः खण्डः २. संस्काररत्नमाला - प्रथमभागे द्वितीयः खण्डः ३. संस्काररत्नमाला - प्रथमभागे तृतीयः खण्डः ४. संस्काररत्नमाला- प्रथमभागे चतुर्थः खण्डः इत्येवं श्रीभट्टगोपीनाथविरचितानां खण्डशः विभक्तानां ग्रन्थानां

कुलसचिव
सम्पूर्णानन्द संस्कृत विश्वविद्यालय
वाराणसी

प्रो. दिनेश कुमार गर्ग
प्रोफेसर
प्राचीन राजशास्त्र अर्थशास्त्र

Scanned with CamScanner

संयुक्तप्रकाशनकार्यक्रमाङ्गतया प्रकाशितम् । एतेषां प्रकाशनाय १०,००००० परिमितः धनराशिः विश्वविद्यालयेन प्रदत्तः । 5. आचार्य - राजचूडामणिदीक्षितः इत्यनेन विरचितः काव्यदर्पणः इत्येषः ग्रन्थः विश्वविद्यालयस्य संयुक्तप्रकाशनकार्यक्रमाङ्गतया प्रकाशितः अस्ति।भागद्वये अयं ग्रन्थः उपनिबद्धः वर्तते। काव्यशास्त्रस्य अध्ययने एषः ग्रन्थः नितराम् उपकरोति इति मत्वा फ्रेन्च् इन्स्टट्यूट् पाण्डिचेरि , पाण्डिचेरि इत्यनया संस्थया विश्वविद्यालयस्य संयुक्तसहयोगेन बहवो हि प्रकाशनप्रयासाः समनुष्ठीयन्ते। 6. 2019 तमे संवत्सरे संस्कृतभारत्याः प्रकाशनेन अलङ्कारमणिहारः इत्येषः ग्रन्थः विश्वविद्यालयस्य संयुक्तसहयोगेन प्रकाशितः । कृष्णब्रह्मतन्त्रपरकालसंयमीन्द्रैः विरचितस्य एतस्य ग्रन्थस्य प्रकाशनं भागचतुष्टये जातम् । क्रमशः यथा - १.अलङ्कारमणिहारः - प्रथमः भागः । अत्र उपमालङ्कारात् समासोक्तिं यावत् २४ सङ्ख्याकाः अलङ्काराः सोदाहरणं संरक्षणं च उपनिबद्धाः सन्ति। २.अलङ्कारमणिहारः - द्वितीयः भागः । अत्र परिकरालङ्कारात् मालादीपकं यावत् २५ अलङ्काराः सोदाहरणं संरक्षणं च उपनिबद्धाः सन्ति। ३. अलङ्कारमणिहारः - तृतीयः भागः । अत्र सारालङ्कारात् हेत्वलङ्कारं यावत् 53 संङ्ख्याकाः अलङ्काराः सोदाहरणं संरक्षणं च उपनिबद्धाः सन्ति। ४.अलङ्कारमणिहारः - चतुर्थः भागः । अत्र रसवद्यलङ्काराणां निरूपणम् अस्ति। ' प्रधानेन्यत्र वाक्यार्थे यत्राङ्गं तु रसादयः काव्ये तस्मिन् अलङ्कारो रसादिरिति मे मतिः '।। इति रसवद्यलङ्काराणां लक्षणम् उक्तम् । अस्मिन् भागे रसवदलङ्कारसरः इत्यस्मात् शब्दालङ्कारसरः इत्येतावत् पर्यन्तं 17 संङ्ख्याकाः अलङ्काराः उपनिबद्धाः वर्तन्ते। एवं भागचतुष्टये उपनिबद्धः लाक्षणिकः ग्रन्थः एषः संयुक्तप्रकाशनकार्यक्रमाङ्गतया सुसम्पादितः । सम्पूर्णानंद संस्कृत विश्वविद्यालयस्य संस्कृत-अकाडमी इत्यस्याः सहयोगेन षष्ठ्यब्दग्रन्थमालायाः संयुक्तप्रकाशनकार्यक्रमस्य अङ्गत्वेन प्रकाशिताः केचन विशिष्टाः दुर्लभाः ग्रन्थाः यथा - १. तारकम् - 2020 तमे वर्षे प्रकाशितम् । अस्य काव्यस्य आङ्ग्लानुवादः अपि भावार्थदीपिका इत्यनया संस्कृतव्याख्यया सह प्रकाशितः । २. सन्निधानं सूर्यनारायणशास्त्रि- लघुकाव्यसङ्ग्रहः - 2022 ३.दीपिकासर्वस्वम् - कुरगण्टि रामशास्त्रिणा विरचितम् । 2022 तमे संवत्सरे सम्पादितम् । ४. अभिज्ञानशाकुन्तलम् - पूर्णचन्द्रिका तथा मृत्युञ्जयभूपालीया इति व्याख्याद्वयोपेतं कालिदासस्य नाटकम् । 2020 तमे संवत्सरे नीलकण्ठं महोदयेन सम्पादितम् । ५. श्रीवेङ्कटेशचम्पूप्रबन्धः - 2021 ६. युधिष्ठिराश्वमेधचम्पूप्रबन्धः -2022 ७. विक्रमोर्वशीयं नाम नाटकम् - 2022 एवं विश्वविद्यालयः विश्वविद्यालयेतराणां शोधसंस्थानां च सहयोगेन विभिन्नान् ग्रन्थान् संयुक्तप्रकाशनकार्यक्रमाङ्गत्वेन प्रतिवर्षं सम्पादयति।

प्रो. दिनेश कुमार गर्ग
प्रोफेसर
प्राचीन राजशास्त्र अर्थशास्त्र

कुलसचिव
सम्पूर्णानन्द संस्कृत विश्वविद्यालय
वाराणसी

Scanned with CamScanner

3.7.3

अस्याः संस्थायाः अन्यविश्वविद्यालयः लब्धप्रतिष्ठप्रकाशनसंस्थाभिः सह संयुक्तप्रकाशन कार्यक्रमस्य विवरणं प्रदीयताम् -

(i) अस्य विश्वविद्यालयस्य ज्योतिषविभागीयः सहायक आचार्यः डा. मधूसूदन मिश्रः काशीहिन्दूविश्वविद्यालयस्य संस्कृतविद्याधर्मसंकायस्य प्रो. शत्रुघ्नत्रिपाठिनः सह पञ्चत्रिशत पाठ्यक्रमान् रेखागणितविषयकान् अलिखत्।'**EPG'** पाठशालायाम् उपलब्धाः सन्ति।

(ii) अस्य विश्वविद्यालयस्य ज्योतिषविभागीयः सहायक आचार्यः डा. राजा पाठकः इग्नू संस्थाया सह दशपत्राणि अलिखत्।अत्र केषाञ्चित् विवरणं दीयते। अंकगणित पत्रम्। रेखागणितपत्रम्। बीजगणिपत्रम्। खगोलयविज्ञान इत्यादीन् सम्बन्धानि अनेकानि पत्राणि निर्मितानि सन्ति।

(iii) अस्याः संस्थायाः ज्योतिषविभागीयः सहायक आचार्यः डा. राजापाठकमहोदयः काशीहिन्दूविश्वविद्यालस्य सहायक आचार्यया श्रीमत्या डा. श्वेता कुमार्या सह संयुक्तं पत्रं अलिखत् "AN INVESTTGATION ON THE IMPACT STUDENTS ABELITY TO EXPEND THE MATHMATICAL UNITS"अस्य लेखस्य प्रकाशनं THE SCIENTIFIC TEMPERअस्यां पत्रिकायां वर्तते।

प्रो. दिनेश कुमार गर्ग
प्रोफेसर
प्राचीन राजशास्त्र अर्थशास्त्र

कुलसचिव
सम्पूर्णानन्द संस्कृत विश्वविद्यालय
वाराणसी

Registrar
Sampurnanand Sanskrit University
Varanasi

Scanned with CamScanner